# Shridhara Kavacha Stotram

# શ્રીધરકવચસ્તોત્રમ્

## Document Information

Text title : Shridhara Kavacha Stotram

File name : shrIdharakavachastotram.itx

Category : deities_misc, gurudev, kavacha, shrIdharasvAmI

Location : doc_deities_misc

Author : sachchidAnandasvAmI

Transliterated by : NA

Proofread by : NA

Description/comments : From shrIdhara sandesha

Latest update : November 10, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 10, 2022

*sanskritdocuments.org*

# શ્રીધરકવચસ્તોત્રમ્

અથાતઃ સમ્પ્રવક્ષામિ કવચં શ્રીધરં ગુરુમ્ ।
યસ્ય સ્મરણમાત્રેણ મુચ્યતે પાતકૈર્નરાઃ ॥ ૧॥

શ્રીગુરુશ્રીધરકવચસ્તોત્રમન્ત્રસ્ય પરમાત્મા ઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ । શ્રીગુરુ શ્રીધરો દેવતા । ગું બીજમ્ ।
રું શક્તિઃ । શ્રીધરેતિ કીલકમ્ ।
અથ કરન્યાસઃ -
શ્રીં અગુષ્ઠાભ્યાં નમઃ । ધં તર્જનીભ્યાં નમઃ ।
રં મધ્યમાભ્યાં નમઃ । શ્રીં અનામિકાભ્યાં નમઃ ।
ધં કનિષ્ઠિકાભ્યાં નમઃ । રં કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
(એવં હૃદયાદિ ન્યાસઃ) ભૂર્ભુવસ્સુવરોમિતિ દિગ્બન્ધઃ ॥

અથ ધ્યાનં -
ધ્યાયેદ્ બ્રહ્મસનાતનં ગુરુવરં મોક્ષશ્રિયાધારિણં
બ્રહ્માનન્દરસાર્ણવં સુખધનં ભક્તેષ્ટકલ્પદ્રુમમ્ ।
અજ્ઞાનાન્ધનિવારણં ગુણનિધિં ભક્તપ્રિયં સુન્દરં
જીવાનાં તરણાર્થમેવ સતતં જ્ઞાનપ્રદં શ્રીધરમ્ ॥

ઇતિ ધ્યાનમ્ ।
શ્રીધરઃ પાતુ મૂર્ધાનં સહસ્રારેણ શોભિતઃ ।
ભાલં પાતુ ગુરુર્દેવઃ ચન્દ્રમણ્ડલમણ્ડિતમ્ ॥ ૧॥

અક્ષૌપાત્વક્ષયઃ શ્રીમાન્ અચ્યુતાનન્તરૂપકઃ ।
ભ્રૂમધ્યં પાતુ સર્વજ્ઞઃ મોક્ષાનન્દસ્વરૂપિણઃ ॥ ૨॥

ઓઙ્કારાત્મશ્રુતિઃ પાતુ શ્રુતિસિદ્ધાન્તગોચરઃ ।
નાસિકાં પાતુ વિશ્વાત્મા વિશ્વાતીતઃ પરાત્મનઃ ॥ ૩॥

મુખં મુક્તિકરઃ પાતુ ભક્તકૈરવચન્દ્રમાઃ ।

ચિબુક ચિન્મયઃ પાતુ ચિદાનન્દસ્વયંપ્રભઃ ॥ ૪॥

જિવ્હાં વેદનિધિઃ પાતુ વેદવેદાન્તગોચરઃ ।
દન્તાન્પાતુ દાનવારિ ધર્મરક્ષણદક્ષકઃ ॥ ૫॥

ઓષ્ઠં પાતુ પરિવ્રાજઃ વૈરાગ્યજ્ઞાનસાગરઃ ।
કપોલં શ્રીકરઃ પાતુ કમલામ્બાતનોભવઃ ॥ ૬॥

કણ્ઠં દણ્ડધરઃ પાતુ જ્ઞાનદણ્ડસુશોભિત ॥

સ્કન્ધૌ ચન્દ્રાનનઃ પાતુ ચન્દ્રકોટિપ્રકાશકઃ ॥ ૭॥

ભૂમાનન્દર્ભુજૌ પાતુ બ્રહ્માનન્દપ્રદાયકઃ ।
કરો કારુણિકઃ પાતુ કમણ્ડલુધરઃ પ્રભુઃ ॥ ૮॥

વક્ષસ્થલં હરિઃ પાતુ સર્વપાપપ્રણાશનઃ ।
હૃદયં શ્રીગુરુઃ પાતુ મોક્ષશ્રીધારણાદીપઃ ॥ ૯॥

ઉદરં વરદઃ પાતુ બ્રહ્માણ્ડોદરવ્યાપકઃ ।
નાભિં પાતુ નરાકારો નામરૂપવિવર્જિતઃ ॥ ૧૦॥

ગુહ્યં પાતુ ગુહ્યરૂપઃ હૃદયાબ્જનિવાસિનઃ ।
ઊરૂ ગુરુવરઃ પાતુ ઊહાપોષવિવર્જિતઃ ॥ ૧૧॥

જઙ્ઘે જ્ઞાનનિધિઃ પાતુ જ્ઞાનમાત્રૈકનિર્મલઃ ।
મૂલાધારં ગુરુઃ પાતુ માયાઽવિદ્યાવિનાશકઃ ॥ ૧૨॥

પાદૌ પાતુ પૂજ્યપાદઃ પાપવિધ્વંસરૂપકઃ ।
ચર્મ ચર્માંમ્બરઃ પાતુ ચારુકાષાયભૂષણઃ ॥ ૧૩॥

અઙ્ગુલીન્દેશિકઃ પાતુ મોક્ષપાણિ ગુરોત્તમઃ ।
રક્તં ભક્તપ્રિયઃ પાતુ ભક્તાનુગ્રહશીલકઃ ॥ ૧૪
માંસં મીમાંસકઃ પાતુ માતૃવત્સલવત્સિતઃ ।
મજ્જાન્તુ અજરઃ પાતુ જન્મકર્મનિવર્તકઃ ॥ ૧૫॥

અસ્થીનિ સ્થિરધીઃ પાતુ કૂટસ્થમચલધ્રુવઃ ।
મેદો વેદાન્તિનઃ પાતુ મેધાબુદ્ધિપ્રદીપકઃ ॥ ૧૬॥

શુક્ર સુખકરઃ પાતુ સુખશાન્તિપ્રચોદકઃ ।
મનો બુદ્ધિમહઙ્કારં રક્ષયેદન્તરાત્મનઃ ॥ ૧૭॥

કર્મેન્દ્રિયાણિ પાત્વીશઃ કૈવલ્યસુખદેશ્વરઃ ।
જ્ઞાનેન્દ્રિયાણ્યજઃ પાતુ અવ્યાજકરુણાકરઃ ॥ ૧૮॥

પ્રાણાન્પાતુ પ્રધાનજ્ઞો પુરાણપુરુષોત્તમઃ ।
સવાઙ્ગં પાતુ સર્વાત્મા સચ્ચિદાનન્દવિગ્રહઃ ॥ ૧૯॥

ગૃહારામધનક્ષેત્રપુત્રાદીન્ રક્ષ મે દ્વિભુઃ ।
ભૂમ્યાદીન્ પાતુ ધર્મજ્ઞઃ ધર્મોદ્ધારાવતારકઃ ॥ ૨૦॥

આત્માનન્દઃ સુખં પાતુ સ્વાનન્દામૃતતૃપ્તકઃ ।
દુઃખાપાતુ નિજાનન્દઃ બ્રહ્માનન્દસ્વરૂપકઃ ॥ ૧૨॥

પ્રાચ્યાં પાતુ પરબ્રહ્મ પાત્વાગ્નેયાં પરાત્મનઃ ।
યામ્યાં ધર્માત્મકઃ પાતુ નૈરૃત્યાં પાતુ વિશ્વજિત્ ॥ ૨૨॥

પ્રતીચ્યાં પુરુષઃ પાતુ વાયવ્યાં પાતુ પ્રાણદઃ ।
કૌબેર્યાં ભગવાન્પાતુ પાત્વેશાન્યાં સદાશિવઃ ॥। ૫૩॥

ઊર્ધ્વાધોદેશકઃ પાતુ ત્રિમૂર્તિસ્વસ્વરૂપકઃ ।
પઞ્ચભૂતાત્મકઃ પાતુ પઞ્ચભૂતાનિ ભીતિતઃ ॥ ૨૪॥

દિવા ચિદમ્બરઃ પાતુ રાત્રૌ ચન્દ્રનિભાનનઃ ।
યક્ષરાક્ષસભૂતાદ્યાત્ પાતુ માં શ્રીધરેશ્વરઃ ॥ ૨૫॥

સર્વજ્ઞઃ પાતુ સર્વત્ર સર્વમઙ્ગલદાયકઃ ।
ષડ્ભાવવિકૃતિં પાતુ ષડૂર્મિરહિતઃ પરઃ ॥ ૨૬॥

ષણ્ણામરીણાં વર્ગં ચ પાતુ જ્ઞાનેશ્વરઃ પુમાન્ ।
રોગાન્નિરામયઃ પાતુ નિત્યશુદ્ધનિરઞ્જનઃ ॥ ૨૭॥

દ્વન્દ્વદુઃખાદ્વિભુઃ પાતુ દ્વન્દ્વાતીત્યેકમદ્વયઃ ।
વ્યાઘ્રચોરાદિભીતીશ્ચ પાતુ માં સર્વરૂપકઃ ॥ ૨૮॥

શ્રીધરાનુગ્રહાદુક્તં મયા કવચમુત્તમમ્ ।
સંસારામયતપ્તાનાં શાશ્વતં મોક્ષદં શુભમ્ ॥ ૨૯॥

યઃ સદા ધારયેત્ ભક્ત્યા સ્તોત્રં કવચમુત્તમમ્ ।
ન તસ્ય જાયતે ક્વાપિ અશુભં ગુર્વનુગ્રહાત્ ॥ ૩૦॥

ધર્માર્થકામમોક્ષાણાં ઇદમેવપરાયણમ્ ।
પુત્રમિત્રકલત્રાદિ સર્વસન્તોષસાધકમ્ ॥ ૩૧॥

ત્રિસન્ધ્યાં પઠતીયસ્તુ શ્રદ્ધાભક્ત્યામતન્દ્રિતઃ ।
સર્વરોગાઃ પ્રણશ્યન્તિ સર્વાબાધાવિનશ્યતિ ॥ ૩૨॥

બહુના કિમિહોક્તેન યદ્યન્મનસિવર્તતે ।
શ્રીગુરોનુગ્રહાદેવ તત્તત્સર્વં ભવેદિહ ॥ ૩૩॥

ઇતિ શ્રીમત્ પરમહંસ પરવ્રાજકાચાર્ય શ્રીસચ્ચિદાનન્દસ્વામિના
વિરચિતં ભગવાન્ સદ્ગુરુ શ્રી શ્રીધરકવચસ્તોત્રં સમ્પૂર્ણમ્ ॥

શ્રીધર સન્દેશ

---

*Shridhara Kavacha Stotram*

pdf was typeset on November 10, 2022

Please send corrections to *sanskrit@cheerful.com*